॥ श्रीकृष्णाय नमः ॥
॥ श्रीमदाचार्यचरणकमलेभ्यो नमः ॥

गोस्वामिश्रीविट्ठलेश्वरप्रभुचरणकृतम्

॥ मुक्तितारतम्यनिर्णयः ॥

(तत्र पूर्वपक्षः)

*नन नुमुक्तौ तारतम्यं न अस्ति, [क]प्रमाणाभावात्, **"परमं साम्यम् उपैति"** (मुण्ड.उप.३।१।३) इति [ख]तारतम्याभावश्रुतेः च. मुक्तौ तारतम्ये दूषणं च अस्ति. तत् किम्? इति चेद् उच्यते, [ग]स्वर्ग-संसार-साम्यं स्याद् मुक्तेः इति एकं दूषणम्. द्वितीयं कथ्यते, [घ]मुक्तस्य अधिकदर्शने दुःखद्वेषेर्ष्यादिकं स्याद्* इति पूर्वपक्षे प्राप्ते,

(उत्तरपक्षे प्रथमानुपपत्तिनिरसनम्)

[क]प्रमाणाभावाद् इति असिद्धं, बहुप्रमाणसत्त्वात्.

श्रुतिप्रमाणैः मुक्तितारतम्योपपादनम् :

"सैषा आनन्दस्य मीमांसा भवति... ते ये शतं मानुषाः आनन्दाः स एको मनुष्यगन्धर्वाणाम् आनन्दः श्रोत्रियस्य च अकामहतस्य" (तैत्ति.उप.२।८) इत्यादितैत्तिरीयश्रुत्या, **"ते ये शतं कर्मदेवानाम् आनन्दाः स एकः आजानजानां देवानाम् आनन्दः"** (तत्रैव), **"यश्च श्रोत्रियो अवृजिनो अकामहतः"** (बृह.उप.४।३।३३) इत्यादिवाजसनेयश्रुत्या, **"अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेषु असमाबभूवुः"** (ऋक्.संहि.१०।७-१।७) इत्यादितैत्तिरीयश्रुत्या,

स्मृतीतिहासपुराणप्रमाणैः मुक्तितारतम्योपपादनम् :

"नृपाद्याः शतधृत्यन्ताः मुक्तिगाः उत्तरोत्तरं सर्वे गुणैः शतगुणाः मोदन्ते इति हि श्रुतिः" (पद्मपुरा. । ।), **"मुक्तानामपि सिद्धानां नारायणपरायणः सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने!"** (भाग.पुरा.६।१४।५) इत्यादिस्मृतिभिः,

श्रुतिस्मृत्यादिश्रुतार्थापत्त्या मुक्तितारतम्योपपादनम् :

"यः ते आशिष आशास्ते न स भृत्यः स वै वणिक्" (तत्रैव ७।१०।४), **"स वै भृत्यः स वै स्वामी, गुणलुब्धो न कामुको, मुमुक्षोः अमुमुक्षुस्तु परो हि एकान्तभक्तिमान्"** ( ) इत्यादिसाधनतारतम्येन फलतारतम्यप्रतिपादकस्मृत्या, **"भक्तिः सिद्धेः गरीयसी"** (भाग.पुरा.३।२५।३३) इति स्मृत्या अल्पभक्तिसाध्यमुक्तितो अधिकभक्तिसाध्यमुक्तेः आधिक्यस्य प्रतिपादिकया, **"अन्येतु एवम् अजानन्तो श्रुत्वा अन्येभ्यः उपासते, तेऽपिच अतितरन्त्येव मुत्युं श्रुतिपरायणाः"** (भग.गीता.१३।२६) इत्यत्र 'अपि'शब्देन, **"स्त्रियो वैश्याः तथा शूद्राः तेऽपि यान्ति परां गतिं, किं पुनः ब्राह्मणाः पुण्याः भक्ताः राजर्षयः तथा"** (भग.गीता.९।३२) इत्यादिसाधनतारतम्येन फलतारतम्यप्रतिपादिकया स्मृत्या, **"साधनस्य उत्तमत्वेन साध्यं च उत्तमम् आप्नुयुः ब्रह्मादयः क्रमेणैव यथा आनन्दश्रुतौ श्रुताः"** ( ) इति स्मृत्या **"अधिकं तव विज्ञानम् अधिका च गतिः तव"** (महाभा.१२।३१४।४४), **"युक्तं वै साधनाधिक्यात् साध्यादिक्यं सुरादिषु, न आधिक्यं यदि साध्ये स्यात् प्रयत्नः साधने कुतः?"** ( ) इति युक्तिगतार्थवचनात्,

श्रुत्यादिप्रमाणान्यथानुपपत्त्या मुक्तितारतम्योपपादनम् :

"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी च इति तां शृणु. श्रद्धामयो अयं पुरुषो यो यच्छ्रद्धः सएव सः"(भग.गीता.१७।२) इत्यादिस्मृत्या **'स्वभावजा'** इति स्वरूप[१]भूतभक्तितारतम्येन चतुर्मुखादयः इतरेभ्यः उत्कृष्टाइति उत्कृष्टत्वप्रतिपादकतया **"अस्मदादिमुक्तिभोगः मुक्तचतुर्मुखभोगाद् निकृष्टो, अस्मदादिभोगत्वात्**

संसारस्थास्मदादिभोगवद्’’ इत्यादियुक्तिभिः च मोक्षतारतम्यसिद्धेः. ‘‘**श्रोत्रियस्य च अकामहतः च**’’ (तैत्ति.उप.२।८) इति श्रुतिगतस्य, ‘‘**यश्च श्रोत्रियः अवृजिनो अकामहतः**’’ (बृह.उप.४।३।३३) इति वाक्यद्वयस्यापि अयम् अर्थः : अकामहतत्वं कामाकृतोपद्रवत्वं नतु अकामत्वं, ‘**हत**’शब्दवैयर्थ्यात्. सच ‘‘**सत्यकामस्य यत्र आप्ताः कामाः तत्र मा अमृतं कृधि**’’ (   ) इत्यादिश्रुतेः, ‘‘**सहि मुक्तो अकामहतः**’’ (ब्रह्माण्डपुरा.   ) इति ब्रह्माण्डोक्तेः च. ‘**अवृजिन**’त्वमपि अदुःखत्वम् अपापत्वं वा मुक्तस्यैव घटते. अपरोक्षज्ञानिन्यपि प्रारब्धपाप-तत्कार्यदुःखयोः सत्त्वात्. श्रोत्रियत्वं च मुक्तस्यैव मुख्यं, ‘‘**प्राप्तश्रुतिफलत्वात्तु श्रोत्रियाः प्राप्तमोक्षिणः तएव च आप्तकामत्वात् तथा अकामहताः मताः**’’ (महाभा.   ) इति भारतोक्तेः.

(उत्तरपक्षे द्वितीयानुपपत्तिनिरसनम्)

[ख] (ननु) *‘‘**परमं साम्यम् उपैति**’’ (मुण्ड.उप.३।१।३) इति मुक्तसाम्यश्रुतेः कथं मुक्ततारतम्यम्? * इति चेत्

तस्य सावकाशत्वाद् दुःखाभाव-सत्यकामत्वादिना सरःसागरयोरिव स्वयोग्यानन्दपूर्त्या च साम्यात्. ‘‘**दुःखाभावः परानन्दो लिंगभेदः समो मतः**’’ (नारा.अष्ट.कल्प) इति स्मृतेः. अन्यथा मुक्तस्य ईश्वरवद् जगत्सृष्टृत्वादिकं स्यात्. तच्च ‘‘**जगद्व्यापारवर्जम्...**’’ (ब्र.सू.४।४।१७) इति सूत्रे त्वयापि निषिद्धं, ‘‘**भोगमात्रसाम्यलिंगात् च**’’ (ब्र.सू.४।४।२१) इति सूत्रस्थ‘**मात्र**’शब्दस्य मन्मते भोगसामान्यएव साम्यं न भोगविशेषः इति अर्थः. त्वन्मतेऽपि भोगसामान्ये मुक्तस्य ब्रह्मसाम्याद्; अन्यथा अपसिद्धान्तत्वात्.

(उत्तरपक्षे तृतीयानुपपत्तिनिरसनम्)

[ग] वाराहेच ‘‘**स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिककृतिष्वपि मुक्तानां नैव कामः स्याद् अन्यान् कामान् च भुञ्जते**’’ (वारा.पुरा.   ) इति.

(उत्तरपक्षे तुरीयानुपपत्तिनिरसनम्)

[घ] नच हर्षेर्ष्यादिप्रसंगो —

निःशेषगतदोषाणां बहुभिः जन्मभिः पुनः।
स्याद् आपरोक्ष्यं हि हरेः द्वेषेर्ष्यादि ततः कुतः?॥
भवेयुः यदि च ईर्ष्याद्याः समेष्वपि कुतो न ते?।
तप्यमानाः समान् दृष्ट्वा द्वेषेर्ष्यादियुताअपि॥
दृष्यन्ते बहवो लोकाः दोषाएव अत्र कारणम्।
हतः सौगन्धिकवने मणिमान् च पुनः कलौ॥
जातो मिथ्यामतिः सम्यग् आस्तीर्यापि तमो अधिकम्।
इन्द्रजालधिया सृष्टिं मन्यन्ते ज्ञानदुर्बलाः॥
नित्यनिरस्तेन्द्रजाले स्वतएव कथं भवेत्।
अशक्ताः सत्यसृष्टौ हि मायासृष्टिं[२] वितन्वते॥
अचिन्त्यानन्तविभवः कथं ताम् ईहते हरिः।
अणुमात्रोऽपि अयं जीवः स्वदेहं व्याप्य तिष्ठति॥
यथा व्याप्य शरीरेषु हरिचन्दनविप्रुषः।
ब्रह्मविष्ण्वीशरूपाणि त्रीणि विष्णोः महात्मनः॥
ब्रह्मणि ब्रह्मरूपी ईशः शिवरूपी शिवे स्थितः।
पृथगेव स्थितो देवो विष्णुरूपी जनार्दनः॥

किञ्च ब्रह्मणि अप्रतिपन्नोपाध्यभावेऽपि पारमार्थिकत्वरूप-धर्माभावस्य ब्रह्मणि अपरिच्छिन्नसद्रूपत्वाविरोधिवद्, घटादेः प्रतिपन्नोपाधिसद्भावेऽपि पारमार्थिकत्वाभाववत्त्वस्य घटादौ परिच्छिन्नसद्रूपत्वाद् अविरोधोपपत्तेः[३] च. एवञ्च ब्रह्म कालत्रयेऽपि सद् वियदादिरूप्यपि च कदाचिदेवेति नित्यत्वानित्यत्वाभ्यामेव वैषम्यं नतु सत्यत्वमिथ्यात्वाभ्याम्. तथाच संग्रहः :

स्वरूपेण त्रिकालस्य निषेधो न अस्ति ते मते।
रूप्यादेः तात्त्विकत्वेन निषेधस्तु आत्मनोऽपि च॥

इति श्रीमद्विट्ठलेश्वरविरचितो मुक्तितारतम्यनिर्णयः
सम्पूर्णः

पाठभेदतालिका

[१] ‘स्वरूपभूतभक्ति’ इति भुवने.म.सा.१ पाठः, ‘स्वरूपभूतभक्तितारतम्येन’ इति कोटा.पाठः.

[२] ‘मायासृष्टिम्’ इति जो पाठः शेषेषु ‘मायासृष्टौ’ इति.

[३] ‘शिवे स्थितः’ इति प्रथमेशसंग्रहः, म.स.१-२ पाठः. शेषेषु ‘शिवस्थितः’ इति.

[४] ‘पारमार्थिकाभावस्य... सद्रूपत्वोपपत्तेः च’ इति भुवने.पाठः, ‘सद्रूपत्वाविशेषोपपत्तेः’ ख.पाठः, ‘सद्रूपत्वाविरोधापत्तेः च’ इति जोध.श्रीमथु.म.-स.१.पाठः.

[५] ‘तथाच संग्रहः’ इति भुवने.पाठः, शेषेषु ‘तच्च संग्रहः’ इति शेषेषु.

······+······

एतद्ग्रन्थसंशोधने विमृष्टाः मातृकाः :

१.गट्टुलालाजी ग्रन्थागारीया ‘पुष्टिभक्तिसुधा’ मासिकपत्रिकायाः ३ वर्षस्य १२ अंके ई.सं.१९१४ वर्षे मुद्रिता आधारभूता मातृका.
२.जो.=जोधपुर राजकीय पुस्तकालयस्थायाः प्रतिलिपिः
३.म.स.१-२.=ऑरियन्टल् इन्स्टिट्यूट् ऑफ महाराजा सयाजिराव बडोदा वि.वि.ग्रन्थागारीया मातृका.
४.मथुरेशजी.=कुत्रत्या इयम् इति निश्चेतुम् अशक्या.
५.कोटा.=गो.श्रीप्रथमेशग्रन्थागारीया.
६.भुवने.=भुवनेश्वरी पीठ, गोंडलग्रन्थागारीया.

* * *

।। श्रीकृष्णाय नमः ।।
।। श्रीमदाचार्यचरणकमलेभ्यो नमः ।।

गोस्वामिश्रीविट्ठलेश्वरप्रभुचरणकृत

।। मुक्तितारतम्यनिर्णयः ।।

(गोस्वामी श्रीश्याममनोहरजीकृत भावानुवाद)

(पूर्वपक्ष)

इस ग्रन्थके नाममात्रके श्रवण करनेपर कुछ अनुपपत्तियां बुद्धिमें उभरतीं हैं. अतः जीवात्माओंके मुक्त हो जानेके बाद उनमें परस्पर तारतम्य मानना उचित नहीं लगता.

[क] सर्वप्रथम अनुपपत्ति तो ऐसा कोई भी प्रमाणवचन उपलब्ध न होनेके कारण उभरती है.

[ख] दूसरी अनुपपत्ति श्रुतिमें भी तारतम्य अस्वीकार करनेको ही मुक्तात्मा और ब्रह्म के बीच परम साम्य **“परमं साम्यम् उपैति”** (मुण्ड.उप.३।१।३) इस वचनमें स्वीकारा गया होनेके कारण उभरती है.

[ग] तीसरी अनुपपत्ति यह है कि मुक्तावस्थामें जीवात्माओंके बीच तारतम्य स्वीकारनेपर मोक्षावस्था और संसार या स्वर्ग एकसमान ही सिद्ध होंगे.

[घ] चौथी अनुपपत्ति यह है कि मुक्तात्माओंके बीच भी परस्पर न्यूनाधिक्य हो तो अधिक मुक्तके बारेमें न्यून मुक्तजीवके भीतर दुःख द्वेष ईर्ष्या आदिके मुक्तिविपरीत भाव भी उभर सकते हैं, ऐसी सम्भावना स्वीकारनी पड़ेगी.

(उत्तरपक्षतया [क]अनुपपत्तिका निरसन)

प्रथम अनुपपत्तिमें यह जो कहा गया है कि मुक्तात्माओंके बीच तारतम्य होनेके कोई प्रमाण नहीं मिलते वह असमीक्षित विधान है, क्योंकि शास्त्रवचनोंके बहुत सारे प्रमाण मिलते ही हैं.

श्रुतिवचनोंके आधारपर तारतम्यकी उपपत्ति : तैत्तिरीयोपनिषद्के ‘‘**यह तो उस आनन्दकी मीमांसा है... ऐसे मनुष्योंके सौ आनन्दके बराबर मनुष्यगन्धर्वका एक आनन्द होता है; और इतना ही आनन्द जो श्रोत्रिय कामनाओंसे ग्रस्त नहीं होता उसका भी होता है**’’ (तैत्ति.उप.२।८) इस वचनमें तारतम्य सुस्पष्टतया प्रतिपादित हुवा ही है. इसी तरह ‘‘**अपने पुण्यकर्मोंद्वारा देवयोनि प्राप्त करनेवाले देवोंके सौ आनन्दके बराबर आजानज देवोंका एक आनन्द होता है**’’ (यथापूर्व) यह भी कहा ही गया है. बृहदारण्यकोपनिषद्में भी ‘‘**जो श्रोत्रिय वृजिनरहित और कामनाओंसे ग्रस्त नहीं होता**’’ (बृह.उप.४।३।३३) ऐसी प्रशंसा की गयी है. एक अन्य तैत्तिरीय शाखाके वचनमें तो यह भी कहा गया है कि ‘‘**समान नयनवाले और समान कर्णवाले भी मनोगम्य विषयोंके प्रति असमान सामर्थ्यवाले बन जाते हैं. मुखके समीप और कूखके समीप रहती जलराशीवाले ह्रदोंमें असमान स्नानार्हताकी तरह.**’’ (ऋक्संहि.१०।७१।७).

स्मृतिवचनोंके आधारपर तारतम्यकी उपपत्ति : न केवल श्रुतिवचनोंमें अपितु स्मृतिवचनोंमें भी ऐसे अनेक विधान उपलब्ध होते हैं कि ‘‘**नृपोंसे ले कर शतधृति पर्यन्त मुक्ति पानेवाले सभी उत्तरोत्तर शतगुणित गुणोंसे अधिक गुणोंवाले होनेसे अधिकाधिक मोदप्रमोदका भोग करते हैं, ऐसा श्रुतिओंमें कहा गया है**’’ (पद्मपुरा.   ). ‘‘**करोड़ों सिद्ध पुरुषोंमें प्रशान्तात्मा हो कर कुछ मुक्त हो पातें हैं, उनमें भी नारायणपरायण तो सुदुर्लभ ही होते हैं!**’’ (भाग.पुरा.६।१४।५) ऐसे अनेक वचनोंमें भी मुक्तोंमें भी नारायणपरायणके सुदुर्लभ होनेका उल्लेख तारतम्यको सिद्ध करता है.

श्रुतार्थापत्तिमूलिका उपपत्ति : ‘‘**जो किसी तरहकी आशा रख कर भगवान्का भजन करता है वह तो भगवान्का भृत्य न हो कर भगवान्को भी क्रयविक्रयके व्यवहारमें फंसाना चाहता व्यापारी है**’’ (भाग.पुरा.७।१०।४), ‘‘**सच्चा भृत्य तो वही है और सच्चा स्वामी भी वही होता है जो एक-दूजेके गुणोंसे लुब्ध हो. नकि एक-दूजेसे अपनी कोई कामना पूर्ण कर लेना चाहता हो. मुक्तिकी कामना रखनेवालोंमें भी अमुमुक्षु होनेके कारण ऐसा जीव तो परम ऐकान्तिकी भक्तिवाला होता है**’’ (   ) इन स्मृतिवचनोंमें देखा जा सकता है कि साधनोंके तारतम्यका निरूपण किया गया है; अतः अर्थापत्तिके बलपर फलोंमें भी तारतम्य प्रतिपादित मानना ही पड़ेगा.

अतएव भागवतमें भी आता है कि ‘‘**भक्ति तो मुक्तिपर्यन्त सिद्धिओंसे भी कहीं अधिक गरीयसी है**’’ (भाग.पुरा.३।२५।३३). अतः अल्पभक्तिद्वारा साध्य मुक्तिकी तुलनामें अधिकभक्तिद्वारा साध्य मुक्तिका भी आधिक्य स्वीकारना ही पड़ेगा. अतएव भगवद्गीताके ‘‘**अन्य तो कुछ लोग किसीसे अन्यथा कुछ सुन रखा होनेके कारण ऐसा समझ ही नहीं पाते; और उपासनामें प्रवृत्त हो जाते हैं. ऐसे भी, परन्तु, श्रुतिपरायण होनेके कारण मृत्युके चक्रके चक्रसे बाहर तो निकल ही जाते हैं...**’’ (भग.गीता.१३।२६) इस वचनमें ‘भी’(=‘अपि’) शब्दका प्रयोग किया गया है. अतः साधनोंके तारतम्यवश फलतारताम्यको स्वीकारना ही पड़ता है. ‘‘**स्त्रिगण वैश्यगण तथा शूद्रगण भी परा गतिको प्राप्त कर पाते हों तो पुण्यशाली भक्त ऐसे ब्राह्मणों या राजर्षिओं के मृत्युसंसाररूपी सागरके पार उतर पानेमें तो कोई शंका ही उठ नहीं सकती**’’ (भग.गीता.९।३२) इस स्मृतिवचनके आधारपर भी तारतम्य सिद्ध होता ही है.

इन वचनोंके अलावा भी ‘‘**ब्रह्मा आदि सभी, क्रमशः, अपने-अपने साधनोंकी उत्तमताके अनुरूप उत्तम सिद्धि प्राप्त करते हैं, जैसा कि**

आनन्दके प्रतिपादक तैत्तिरीयोपनिषद्के वचनमें उपलब्ध होता ही है'' (   ) इस तरहके श्रुत्युक्त तारतम्यके उपोद्बलक स्मृतिवचन भी तो मिलते ही हैं. जैसे कि ''**उसका विज्ञान अधिक उत्तम होता है अतएव उसकी गति भी अधिक उत्तम होती है**'' (महाभा.१२।३१४।४४), ''**देवगणोंको मिलता आनन्द उनके साधनोंकी श्रेष्ठताके अनुरूप होता है. क्योंकि यदि श्रेष्ठ फल न मिलता हो तो अधिक श्रेष्ठ साधनाके हेतु कौन प्रवृत्त होना चाहेगा?**'' (   ) ऐसे युक्तिगर्भित शास्त्रवचन भी मिलते ही हैं.

''**अपने-अपने स्वभावके अनुरूप देहधारियोंकी श्रद्धा भी तीन तरहकी होती है : सात्त्विकी राजसी और तामसी. अतः पहले इन्हें सुन लो. यह पुरुष श्रद्धामय होता है अतः जो जिसमें श्रद्धाशील होता है वह वैसा बन जाता है**''(भग.गीता.१७।२) ऐसे स्मृतिवचनोंमें श्रद्धाको '**स्वभावजा**' कह कर उत्तम मध्यम कनिष्ठ यों तत्तत् प्रकारकी श्रद्धाओंसे पनपी भक्तिके स्वरूपमें ही तारतम्य होनेके कारण चतुर्मुख ब्रह्मा आदि इतरोंसे उत्कृष्ट माने गये हैं. अतः ''हमारे मुक्तिसुखका उपभोग चतुर्मुख ब्रह्मा आदिके मुक्तिके सुखोपभोगसे निकृष्ट होता है, हम हीनाधिकारिओंका मुक्तिसुखोपभोग होनेके कारण, हमारे सांसारिक सुखके उपभोगकी तरह'' इत्यादि युक्तिओंके आधारपर भी मोक्षके प्रकारोंमें तारतम्य सिद्ध हो जाता है.

अतः ''**जो श्रोत्रिय कामनाओंसे ग्रस्त न हो उसे भी ऐसी ही आनन्दानुभूति होती है**'' (तैत्ति.उप.२।८) इस श्रुतिवचन और ''**और जो निष्पाप श्रोत्रिय कामनासे ग्रस्त नहीं होता**'' (बृह.उप.४।३।३३) इन दोनों श्रुतिवचनोंका अर्थ यों समझना चाहिये : कामनासे ग्रस्त न होनेका अर्थ सर्वथा निष्काम होना नहीं प्रत्युत मिथ्या कामनाओंके कारण प्रकट होते उपद्रवोंसे रहित होना है, अन्यथा '**अकामहत**' पदमें 'हत'पद अर्थहीन सिद्ध होगा. यह ''**सत्य होनेके कारण जो कामनायें परिपूर्ण होती उन कामनाओंवाला मुझे अमृत बनाओ**'' (   ) ऐसी श्रुतिओंके अवलोकन करनेपर यह प्रकट होता है. अतएव ब्रह्माण्डपुराणमें भी एक वचन ऐसा मिलता है कि ''**जो कामनाओंसे ग्रस्त नहीं होता वह मुक्त होता है**'' (ब्रह्माण्डपुरा.   ). '**अवृजिन**' होना भी दुःखरहित या पापरहित होना मुक्तात्माके साथ ही सार्थक होता है. क्योंकि अपरोक्षज्ञानीमें भी प्रारब्ध पाप और उसके फलरूप मिलते दुःख तो होते ही हैं. अतएव श्रोत्रिय होना भी मुक्तात्माके साथ मुख्यतया संगत होता है. जैसा कि महाभारतमें भी कहा ही गया है ''**जिन्हें श्रुत्युक्त फल मिल गया हो ऐसे मोक्ष प्राप्त कर लेनेवाले ही आप्तकाम होनेके कारण श्रोत्रिय तथा अकामहत होते हैं**'' (महाभा.   ).

(उत्तरपक्षतया [ख] अनुपपत्तिका निरसन)

अब इस आशंकाका समाधान भी खोजा जा सकता है कि तब ''**परमं साम्यम् उपैति**'' (मुण्ड.उप.३।१।३) इस 'परमसाम्य'पदका अभिप्राय क्या समझना. इसे इस तरह समझा जा सकता है कि जैसे कोई सरोवर और सागर की अपनी-अपनी विभिन्न गहराई और विभिन्न विस्तार होनेके बावजूद कोई सरोवर अपनी गहराई और विस्तार के अनुरूप लबालब भर कर सागरकी तरह लहरा रहा हो तो उसे 'सागर' भी कहते हैं. इसी तरह ब्राह्मिक आनन्द अन्य अनेक विलक्षणताओंके साथ सत्यकाम आदि गुणोंके कारण सर्वथा दुःखरहित होता है, वैसे ही मुक्तात्माका आनन्द भी उसकी अपनी विलक्षणताके बावजूद सत्यकाम आदि गुणोंके कारण सर्वथा दुःखरहित होता है; और इस अर्थमें दोनोंमें परमसाम्य स्वीकारना उचित ही है. इसलिये कहा भी गया है कि ''**मुक्तात्माओंमें लिंगोंका भेद नहीं होता और उनमें प्रकट होता आनन्द भी ब्रह्मकी तरह सर्वथा दुःखोंसे रहित ही परम कोटिका होता है**'' (नारा.अष्ट.कल्प). ब्रह्म और मुक्तात्माओं

के बीच यदि कतिपय प्रमुख गुणोंके समान होनेकी अपेक्षावश ‘परमसाम्य’ कहा गया न मान कर ऐकान्तिक परमसाम्य स्वीकारनेपर तो मुक्तात्माओंके भीतर परमेश्वरकी तरह जगत्के सृष्टा पालक या संहारक होनेका भी सामर्थ्य स्वीकारना गलेपतित होगा. वह तो “**जगद्व्यापारवर्जम्**...” (ब्र.सू.४।४।१७) इस ब्रह्मसूत्रमें मायावादिओंने भी कहां स्वीकारा है? “**भोगमात्रसाम्यलिंगात् च**” (ब्र.सू.४।४।२१) इस ब्रह्मसूत्रगत ‘मात्र’ पदका हमारे मतमें भी उक्त दुःखाभावरहित आनन्दके साधारण भोगकी अपेक्षावश ही साम्य माना गया है, ब्रह्मके देश-काल-स्वरूपतः सर्वथा अपरिच्छिन्न आनन्दोपभोगकी दृष्टिसे नहीं. शांकर मतमें भी इसी तरह सामान्य आनन्दोपभोगको लेकर ही मुक्तात्माओंकी ब्रह्मके साथ समानता निरपित हुयी है. ऐसा न माननेपर तो अपसिद्धान्त होनेकी आपत्ति उठ खड़ी होगी.

(उत्तरपक्षतया [ग] अनुपपत्तिका निरसन)

अतएव वाराहपुराणमें कहा गया है कि “**अपने स्वरूपसे अधिक आनन्दके मिल जानेके कारण सृष्टिकी संरचना-पालन-संहरणादिकी परमेश्वरोचित क्रिया-कर्मोंमें उलझनेको मुक्तात्माओंके भीतर कामना जागती ही नहीं है अतः मुक्तात्मायें इन क्रिया-कर्मोंको करनेकी कामनाके बजाय अन्य ही कुछ कामनाओंका उपभोग करते हैं**” (वारा.पुरा.).

(उत्तरपक्षतया [घ] अनुपपत्तिका निरसन)

जहां तक मुक्तात्माओंके भीतर राग-द्वेष हर्ष-शोक ईर्ष्या आदि मनोभावोंसे ग्रस्त होनेकी आपत्ति दिखलायी गयी, उस विषयमें यह कहना उचित होगा कि—

> अनेकानेक जन्मोंके बाद सारे दोषोंके निरस्त हो जानेपर जब श्रीहरिके अपरोक्ष दर्शन होते हैं तब द्वेष ईर्ष्या जैसे क्षुद्र मनोभावोंका प्रसंग कहांसे उभर सकता है?

यदि श्रीहरिके अपरोक्ष दर्शनके बाद भी ईर्ष्या-द्वेष आदि मनोविकार उभर पाते हों तो परमसाम्यावस्थामें भी क्यों उभर नहीं पायेंगे? अपने समान तप करनेवालोंमें भी द्वेष ईर्ष्या आदिके मनोविकार भी तो बहुत सारे साधकोंमें दिखलायी देते ही हैं. अतः ऐसे मनोविकारोंके प्रकट होनेमें साम्य या तारतम्य हेतु नहीं होता प्रत्युत मनोगत वासनायें ही दोषरूपा कारण बनती हैं.

सौगन्धिक वनमें जो मणिमान्को मार दिया गया था वही पुनः कलियुगमें द्वैत या तारतम्य मात्रको मिथ्या माननेवालेके रूपमें प्रकट हुवा होनेके कारण अधिकाधिक तमोदृष्टिका विस्तार अब करता हुवा लगता है. अतः ज्ञानदुर्बलोंको लगता है कि सारी सृष्टि इन्द्रजाल है! परन्तु परमेश्वरके अपरिच्छिन्न एवं अकुण्ठित ज्ञान-वैराग्य आदि गुणोंसे सम्पन्न होनेके कारण उनके समक्ष इन्द्रजाल कौन फैला सकता है?

जो सत्य सृष्टिकी रचनार्थ अक्षम हो वही मायासृष्टिके प्रदर्शनमें प्रवृत्त होता है. अचिन्त्य अनन्त सामर्थ्यवाले श्रीहरिको ऐसी ऐन्द्रजालिकी सृष्टिकी रचनामें प्रवृत्त होनेका कोई हेतु विचारणीय नहीं लगता.

यह जीव तो परिमाणमें अणुमात्र है तो भी अपने देहमें अपनी चेतनाको फैला कर अवस्थित होता है जैसे चन्दनके कुछ छींटे शरीरपर कहीं लगानेपर सारे शरीरमें शीतलताकी अनुभूति होती है.

ब्रह्मा विष्णु और महेश तीनों कही महामहिम विष्णुके ही विभिन्न अमायिक रूप हैं. ब्रह्मामें वह ब्रह्मरूपी है, महेशमें वह शिवरूपी होनेपर भी वह देव पृथक्तया भी अवस्थित होता है.

मायावादके अनुसार ऐसी आपत्ति करनेवालेको यह बात लक्ष्यमें रखनी चाहिये कि ब्रह्ममें पारमार्थिक सत् होनेका धर्म अपनी प्रतिपन्न=प्रतीत होती ब्रह्मरूप उपाधिमें जैसे माना नहीं गया है फिरभी इस पारमार्थिकसत्तारूपी धर्मका अभाव स्वयं ब्रह्मके अपरिच्छिन्न सद्रूप होनेमें बाधक नहीं बनता. इसी तरह घट-पट आदि प्रापंचिक विषयोंमें भी अपनी प्रतीत होती उपाधिमें पारमार्थिक सत् न होनेपर भी उनके वस्तुतः पारमार्थिक होनेमें बाधक होना नहीं चाहिये क्योंकि घट-पट आदि विषय भी परिच्छिन्न सद्रूप तो हैं ही अतः कोई विरोध उभरना नहीं चाहिये. अतः ब्रह्म त्रैकालिक सत् होनेपर भी आकाश-वायु-तेज-जल-पृथ्वी आदि प्रापंचिक रूप कभी धारण करता है तो कभी नहीं भी. इसलिये दोनोंके बीच कौन नित्य तो कौन अनित्य आदि ऐसी दृष्टिसे वैषम्य हो ही सकता है. परन्तु एतवता ब्रह्मको ही केवल पारमार्थिक सत्य और प्रपंचको मिथ्या मान लेना विचारसंगत कथा नहीं लगती :

> प्रापंचिक किसी भी पदार्थका स्वरूपेण तो त्रैकालिक निषेध मायावादमें भी नहीं माना गया है रजत आदिकी तरह अपने प्रतीत होते अधिष्ठानपर कालत्रयमें प्रतीत न होनेकी अपेक्षावश किया जाता निषेध आत्माका भी किया ही जा सकता है.

इस तरह श्रीमद्विट्ठलेश्वर प्रभुचरणद्वारा विरचित मुक्तितारतम्यनिर्णयका
गोस्वामी श्रीश्याममनोहरजी विरचित भावानुवाद
यहां समाप्त होता है

* * *